त्मासवः स्मृता।” इति सिद्धान्तकौमुदुक्तदिशावसेयाः। स्वयां स्थाने जाता ये यमाः पूर्वोक्ताः प्रातिशाख्ये प्रसिद्धाः। स्वयः, स्वरः शषसहाः। एते श्वासानुप्रदाना अघोषाः कण्ठं विवृण्वते च। अन्ये एतद्भिन्नाः सर्वे वर्णा घोषसंवारनादबाह्यप्रयत्नवन्तः। वर्गीयप्रथमतृतीय-पञ्चमवर्णाः प्रथमतृतीयवर्गजातयमाश्च पूर्वोक्ताः यणश्च एते अल्पप्राणास्तद्भिन्नाः सर्वे महाप्राणा इति विवेकः।” “तथा उदात्तानुदात्तस्वरितरूपास्त्रिविधाः स्वरा ह्रस्वदीर्घप्लुतकालभेदाश्च स्वराणां विशेषाधाने हेतवो वेदितव्याः। तथा हि “विभागः पञ्चधा मतः” इत्युपक्रम्य “स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः” इति स्वरकालस्थानप्रयत्नानुप्रदानाभिधेयबाह्यप्रयत्नान् वर्णविभाजकान् पञ्च सामान्यतो निर्दिश्य शिक्षाकृता उदात्तश्चानुदात्तश्चेत्यादिना अच्चेव स्वरकालयोर्विभाजकताऽभिहिता। तत्र ताल्वादिषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तः नीचैरुच्चार्यमाणोऽनुदात्तः प्रथमार्द्धे-उदात्तत्वयोच्चार्य्य उत्तरार्द्धमनुदात्ततयोच्चार्य्यमाणः स्वरितः इति “उच्चैरुदात्तः नीचैरनुदात्तः समाहारः स्वरितः तस्य आदित उदात्तमर्द्धह्रस्वमिति” पाणिनिसूत्रजातेभ्यः। तदेवं परस्परविभाजकस्थानबाह्याभ्यन्तरप्रयत्नस्वरकालकृतविशेषात् वर्णानां परस्परविशेषरूपता। सर्वे हि वर्णाः पुरस्कृत्यैव किञ्चिद्विशेषं विशेषताभाजो भवन्तीति।”

विवाहोपयोगिनि नक्षत्रविशेषकृते १६वर्णकूटे उपयमशब्दे वर्णकूटोक्तौ ११४६ पृ० दृश्यम्।

**वर्णक** न०वर्णयति वर्ण-ण्वुल्। १हरिताले रत्नमा०।२अनुलेपनयोग्ये अमरः ३पिष्टे ४इष्टे वा चन्दनादौ द्रव्ये च। ५हिङ्गुलादौ पुंस्त्री० भरतः ६मण्डने शब्दर०। एकस्यैव स्वतादेः पद्यान्तरव्याख्यानरूपे ७ग्रन्थभेदे न० “विपुषाह्वले तृतीयवर्णके”मिता०। ८चारणे पुं०मेदि०।

**वर्णकूपिका** स्त्री वर्णानामक्षराणां लेखनाय क्षुद्रः कूपः कूपी सेव कन्। मस्याधारे त्रिका०।

**वर्णचारक** पु० वर्णं शुक्लादिरूपं चारयति चर-णिच्-ण्वुल्। चित्रकरे शब्दमा०।

**वर्णज्येष्ठ** पु० वर्णेषु ज्येष्ठः प्रथमसृष्टत्वात्। १अग्रजे विप्रे। स्त्रीमात्रेषया २श्रेष्ठवर्णकूटयुते त्रि०। “वर्णज्येष्ठा च या नारी” स्मृतिः।

**वर्णतूलि(ली)** स्त्री वर्णानां लेखनसाधनं तूलिः। लेखन्याम् शब्दर०स्वार्थे क। अत्रैव [जटा०।२वर्णपदे त्रि०

**वर्णद** न० वर्णं ददाति दा-क। १कालीयके गन्धद्रव्ये।

**वर्णदात्री** स्त्री वर्णं रूपं ददाति दा-तृच् ङीप्। १हरिद्रायाम् राजनि० २वर्णदातरि त्रि०।

**वर्णदूत** पु० वर्णा एव दूतो यत्र। लिपौ त्रिका०।

**वर्णधर्म** पुंन० ६त०। विप्रादीनामसाधारणे धर्मे यथा विप्रस्य याजनाध्यापनप्रतिग्रहादिः। क्षत्रियस्य प्रजापालनादिः पु० जातिधर्मशब्दे दृश्यम्।

**वर्णमातृ** स्त्री ६त०। वर्णानां मातेव। लेखन्यां हारा०।

**वर्णमातृका** स्त्री सरस्वत्यां शब्दच०।

**वर्णमाला** स्त्री ६त० १जातिमालायां २अक्षरश्रेण्यां ३अन्त्ययोगकर्मणि पञ्चाशद्वर्णात्मकमाल्यभेदे। अक्षमालाशब्दे ४३पृ० दृश्यम्।

**वर्णरेखा** स्त्री वर्णान् लिखत्यनया लिख-करणे घञ् रस्य वः। कठिन्यां (खड़ि) त्रिका०।

**वर्णवती** स्त्री वर्ण+मतुप् मस्य व। १हरिद्रायां जटा०। २वर्णविशिष्टे त्रि०स्त्रियां ङीप्।

**वर्णविलोडक** पु० १लोकचौरे २सन्धिचौरे मेदि०।

**वर्णसङ्कर** पु० सम्+कृ-अप् वर्णतः सङ्करः। विप्रादिभ्यो वर्णेभ्योऽनुलोमजाते प्रतिलोमजाते मूर्द्धावसिक्तादौ मागधादौ च जातिभेदे “जायते वर्णसङ्करः” गीता। जातिशब्दे ३०८१ तद्भेदादिकं दृश्यम्।

**वर्णसि** पु० वर्ण-असिच्। जले उणादि०।

**वर्णा** स्त्री प्रशस्तवर्णोऽस्त्यस्याः फलपुष्पादौ अच्। आढक्याम् शब्दच०। [लेखन्याम् शब्दच०।

**वर्णाङ्का** स्त्री वर्णा अक्षराणि अङ्क्यन्तेऽनया अङ्कि-अच्।

**वर्णात्मन्** पु० वर्णं आत्मा स्वरूपं यस्य। ध्वन्यात्मकाद्भिन्नत्वे अकाराद्यक्षरे शब्दभेदे जटा०।

**वर्णार्ह** पु० वर्णं स्तुतिमर्हति अर्ह-अण्। मुद्गे राजनि०।

**वर्णिका** स्त्री वर्णा अक्षराणि लेख्यत्वेन सन्त्यस्याः ठन्। १लेखन्याम् २कठिन्यां हारा० ३मस्यां त्रिका०।

**वर्णित** त्रि० वर्ण-क्त। १स्तुते अमरः २कृतवर्णने ३रूपान्तरमापादिते च।

**वर्णिन्** पु० वर्णोऽस्त्यस्य इनि। १चित्रकरे २लेखके ३ब्रह्मचारिणि मेदि०। “अथाह वर्णी विदितो महेश्वर” कुमारः। ४विप्रादिजातौ च “वर्णिनां हि वधो यत्र” स्मृतिः। [हरिद्रायाम् अमरः।

**वर्णिनी** स्त्री वर्णः अस्त्यस्याः प्राशस्त्ये इनि ङीप्।